उपशास्त्री - II खण्ड साहित्य - तृतीय - पत्रम्

किरातार्जुनीयम् - प्रथमः सर्गः

प्र० (1) - अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम्॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितः किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति यदि पराक्रमं निरस्य चिराय शान्तिरेव कल्याणसाधनम् इति मन्यसे चेत् तर्हि राजचिह्नेनानेन धनुषा किम्। एतत् परित्यज्य जटां धारयन् अस्मिन्नेव वने मुनिर्भूत्वा होमं कुरु।

व्याख्या - अथ = यदि। निरस्तविक्रमः (सन्) = उत्साहरहित होकर। चिराय = चिरकाल के लिए। क्षमाम् एव = क्षमा को ही। सुखस्य साधनं = सुख का उपाय। पर्येषि (चेत्) = समझते हो (तो) लक्ष्मीपतिलक्ष्म = भगवान् (ऐश्वर्यशाली) के चिन्ह (इस)। कार्मुकं = धनुष को। विहाय = छोड़कर। जटाधरः सन् = जटाधारी होकर। इह = इस वन में। पावकं जुहुधि = (होम करके) अग्नि को तृप्त करें।

Renu Devi

24/07/21

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

उपशास्त्री - द्वितीय खण्ड साहित्यम् - तृतीय - पत्रम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

प्र०(1) - पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

व्याख्या :- अस्मिन् श्लोके राजा दिलीप सुदक्षिणाश्च मध्ये नन्दिन्याः वर्णनं करोति।

वशिष्ठाश्रमस्य समीपे पृष्ठे राजा दिलीपः, मध्ये नन्दिनी पुनरग्रे सुदक्षिणा इति क्रमः आसीत्। तदानीं दम्पत्योर्मध्ये स्थिता नन्दिनी दिनरात्र्योः मध्यस्थिता सन्ध्यावत् शुशुभे। अत्र प्रतापिनो राज्ञो दिलीपस्य दिनसादृश्यात् चन्द्रमुखामाश्च सुदक्षिणायाश्च चन्द्रयुतनिशासादृश्यात् पाटलवर्णाया नन्दिन्या दिनक्षपामध्यगत सन्ध्यासाम्यमाविष्कृतमस्ति।

Renu Devi
24/04/21
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

शास्त्री-I खण्ड

साहित्यम्

अभिज्ञानशाकुन्तलम्

सप्तमोऽङ्कः

प्र० ए- भुवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम्॥

उत्तरम्-प्रसंगः :- प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य शास्त्रस्य सप्तमोऽङ्कः उद्धृतोऽस्ति।

अस्मिन् श्लोके पुरुवंश समुद्भवोऽयं बाल इति तपस्विन्या उत्तरं श्रुत्वा आश्रमसद्भाव संगति वितर्कयन् दुष्यन्तो ब्रूते -

व्याख्या :- धर्मशीलाः पौरवाः धर्मरक्षार्थमेव यौवने मध्येषु राजप्रासादेषु निवसन्ति। वार्द्धक्ये तु मुनिव्रतं ग्रहीतुकामाः सुयोग्ये तनये राज्यरक्षणभारं विन्यस्य एकया पतिव्रतया प्रधान भार्यया सार्कं वानप्रस्थाश्रमे तपोवने निवसन्ति। तेषामेवान्यतमस्य कस्यापि राजर्षेरयं बालकः सम्भवतीति तपोवनेऽपि पुरुवंशोद्भवस्यास्य निवासो युक्तं एव प्रतिभाति। अत्र रूपकानुप्रासावलंकारौ मालभारिणी वृत्तश्च।

Renu Devi
24/04/21
राधा उमाकान्त सं० महावि० - सुरखसे
पूर्णिया।

शास्त्री III खण्ड — साहित्यम्

रघुवंश महाकाव्यम्

चतुर्दशः सर्गः

प्र०(1) - उत्तिष्ठ वत्से ! ननु सानुजोऽसौ वृत्तेन भर्ता शुचिना तवैव ।
कृच्छ्रं महत्तीर्ण इति प्रियार्हां तामुचतुस्ते प्रियमप्यमिथ्या ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य चतुर्दश सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके माता कौशल्यासुमित्रश्च सीतां प्रति कथयति — अयि कल्याणि सीते ! उत्तिष्ठ, तवैव सुचरितस्य पातिव्रत्यस्य च प्रभावात् एव सलक्ष्मणः त्वत्पतिः श्रीरामो दुस्सहं दुःखसंकटं तीर्णं इति श्वश्र्वौ कौशल्यासुमित्रे मधुर भाषणार्हां वधूं सीतां सुनृतं वचनमुक्त्वाऽभिनन्दयामासतुरिति भावः ।

व्याख्या:- ननु वत्से ! = अयि सीते ! उत्तिष्ठ = उत्थिता भव । असौ = अयम् । सानुजः = सहावरजः, सलक्ष्मणः । ते भर्ता = त्वत्पतिः रामः । तवैव = भवत्या एव । शुचिना = पवित्रेण । वृत्तेन = चरित्रेण, पातिव्रत्येन । महत् = दुःसहम् । कृच्छ्रं = दुःखम् । तीर्णः = तीर्णवान् । इति = इत्थम् । ते = श्वश्र्वौ, कौशल्यासुमित्रे । प्रियार्हां = प्रियवचनयोग्याम् । तां = वधूम्, स्नुषां सीताम् । प्रियमपि = अभीष्टमपि । अमिथ्या = सत्यं वचनम् । ऊचतुः = जगदतुः ।

Renu Devi
24/04/21

शास्त्री उमाकान्त सं० महावि० सुखसेना, पूर्णिया